# केन्द्रीयसंस्कृतविश्वविद्यालयः


## गुरुवायूर परिसरः

## पुरनाट्टुकरा,तृश्शूर्

## शिक्षकपर्व – २०२२

## प्रतिवेदनम्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरे ०५/०९/२०२२ आरभ्य ०९/०९/२०२२ दिनाङ्कं यावत् **शिक्षकपर्व**कार्यक्रमः समायोजितः। श्रीमतः डा. सर्वेपल्लि राधाकृष्णन् वर्यस्य जन्मदिनमुपलक्ष्य आभारतं शिक्षकदिवसः समाचर्यते। तदङ्गम् अस्माकं केन्द्रीयसंस्कृतविश्वविद्यालये अपि कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे गुरुवन्दनं विशिष्टव्याख्यानम्, शिक्षकसम्माननम्, निबन्धलेखनप्रतियोगिता, शिक्षकगुणानुकीर्तनम्, शैक्षिकचलनचित्रदर्शनम् इति नैके कार्यक्रमाः समायोजिताः। अस्य कार्यक्रमस्य संयोजकाः डा. के. गिरिधररावः, डा. विद्याधरप्रभलः, श्री. सुब्रह्मण्यभट्टश्च आसन्।






१. निबन्धलेखनप्रतियोगिता।

परिसरे विद्यमानेभ्यः सर्वेभ्यः छात्रेभ्यः ०२/०९/२०२२ दिनाङ्के मध्याह्ने ३.०० वादनतः ४.०० वादनपर्यन्तं "छात्रवत्सलः गुरुः" इत्यस्मिन् विषये निबन्धलेखनप्रतियोगिता शिक्षाशास्त्रिकक्ष्यायां समायोजिता। अस्यां प्रतियोगितायां १८ छात्राः सोत्साहेन भागमगृह्णन्। तेषु प्रथमस्थानं शिल्पा आर् एस्, द्वितीयस्थानं नीतुराणि राउत्, तृतीयस्थानं शुभश्री ज्योतिषी च प्राप्नुवन्।



२. गुरुवन्दनं विशिष्टव्याख्यानञ्च।


कार्यक्रमोऽयं परिसरीयसभाभवने प्रातः १०.३० तः ०१.०० वादनपर्यनतं ०५/०९/२०२२ दिनाङ्के समायोजितः। परिसरीयच्छात्रैः सर्वेषामपि अध्यापकानां चरणेषु पुष्पार्चनपूर्वकं वन्दनं कृतम्। परिसरस्य शिक्षाशास्त्रिविभागस्य अध्यक्षाः प्रो. के. के. षैन् वर्याः डा. सर्वेपल्लि राधाकृष्णन् वर्यस्य व्यक्तित्वं जीवनदर्शनञ्च इति विषयमधिकृत्य विशिष्टव्याख्यानमकार्षुः। अस्य कार्यक्रमस्य अध्यक्षा प्रो. आर्. प्रतिभा महाभागा आसीत्। कार्यक्रमस्य संयोजकाः डा. के. गिरिधर राववर्याः अपि मञ्चमलञ्चक्रुः। सभायाः सञ्चालनं डा. विद्याधरप्रभलवर्याः अकुर्वन्, स्वागतवचांसि श्री. सुब्रह्मण्यभट्टवर्यैः प्रोक्तानि।








३. शिक्षकसम्माननं पुरस्कारवितरणञ्च।



कार्यक्रमोऽयं परिसरीयसभाभवने मध्याह्ने २.३० वादनतः ०५.३० वादनपर्यनतं ०५/०९/२०२२ दिनाङ्के समायोजितः। शिक्षकपर्वकार्यक्रमस्य प्रधानः प्राणभूतः घट्टः अयमासीत्। अस्मिन् परिसरे ये भूतपूर्वाः आचार्याः आसन् तेषां सम्माननं कर्तव्यमिति सङ्कल्पं मनसिकृत्य अयं कार्यक्रमः समायोजितः। कार्यक्रमेऽस्मिन् प्रो. के. टि. माधवन् वर्याणां तथा प्रो. पि. सि. मुरलीमाधवन् वर्याणां च सम्माननं कृतम्। कार्यक्रमे शिक्षाशास्त्रिविभागाध्यक्षाः प्रो. के. के. षैन् वर्याः अध्यक्षाः आसन्। निदेशकाः प्रो. ललिलकुमारसाहुवर्याः दिग्दर्शनमकुर्वन्। संयोजकाः डा. के. गिरिधरराववर्याः सम्मानपत्रवाचनं धन्यवादकथनञ्चाकुर्वन्। सञ्चालनं श्री. सुब्रह्मण्यभट्टवर्यः अकरोत्। अतिथीनां सम्माननं सर्वैः आचार्यैः मिलित्वा सम्मनपत्र-राङ्कवदानपूर्वकं कृतम्। अस्मिन्नेव सन्दर्भे ये छात्राः निबन्धलेखनप्रतियोगितायां पुरस्कारं प्राप्नुवन् तेभ्यः प्रशस्तिवितरणम् अतिथिभिः कृतम्। शान्तिमन्त्रेण कार्यक्रमः समाप्तः।












४. शिक्षकगुणानुकीर्तनम्।


केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिभिः प्रो. श्रीनिवासरखेडिवर्यैः प्रदत्तसूचनानुसारं विशिष्टोऽयं कार्यक्रमः ०६/०९/२०२२ दिनाङ्के मध्याह्ने २.३० वादनतः ०४.०० वादनपर्यन्तं समायोजितः।

शिक्षकगुणानुकीर्तनकार्यक्रमे प्रत्येकमाचार्यः चीटिकाचयनपूर्वकं कस्यचिदन्यस्य आचार्यस्य गुणकीर्तनमकरोत्। अनेन कार्यक्रमेण परस्परमाचार्येषु स्नेहबन्धः अवर्धत। अस्मिन्कार्यक्रमे सर्वेऽपि आचार्याः सोत्साहं भागमगृह्णन्। कार्यक्रमस्यान्ते अध्यक्षाः प्रो. ललितकुमारसाहुवर्याः सर्वानुद्दिश्य उद्बोधनमकुर्वन्। कार्यक्रमस्य सञ्चालकः आसीत् डा. विद्याधरप्रभलवर्यः।












५. शैक्षिकचलनचित्रप्रदर्शनम्।

शिक्षकानां माहात्म्यप्रतिपादकं किञ्चित् चलच्चित्रं सन्दर्भेऽस्मिन् प्रदर्शितम्। ०६/०९/२०२२ दिनाङ्के मध्याह्ने ०४.०० वादनतः ०६.०० वादनपर्यन्तं I am Kalam, Madam Geetarani इति चलच्चित्रं प्रदर्शितम्। तत्र सर्वेऽपि छात्राः अध्यापकाश्च समवेताः आसन्।





**संयोजकः**

**डा.के.गिरिधर रावः**

CENTRAL SANSKRIT UNIVERSITY (UNDER MINISTRY OF HRD GOVT. OF INDIA)
GURUVAYOORCAMPUS
P.O. PURANATTUKARA
THRISSUR DIST.
KERALA-680 551

**निदेशकः**

**प्रो. ललितकुमारसाहुः**